सुभाषितरत्नसमुच्चयः ।

PARTS I. & II.

FOR

TANDARDS IV. & V.

BY

.MCHA DI A JOGLEKER, B. A.,

AND

AMAN GOVI D NT, B. A.,

P rietar H h School, Ahmedabad.

[Postage Extra.

at t T VECHAKA Press.

1 4.

BOMBAY :—Printed by Bhiwaji H
"TATVA-VIVECHAKA Press" No. 1-2-3 Khet
Published by Messrs. Joglekar aud Sant in Raip ... imited

PREFACE.

We must offer our heart-felt thanks to both the University and the Educational Department for having recognised the importance of and for having given its due place to Literature in the recent changes made in the Sanskrit Curriculum for High School Standards. The most satisfactory feature of the changes is the introduction of easy Sanskrit Poetry which may be regarded as the soul of Sanskrit Literature.

Since the introduction of the recent changes, selections both in prose and verse have been published: but they are for the most part meant for Senior Standards in High Schools; and the very few, that are ostensibly meant for Junior standards, cannot, so far as our experience goes, meet with their requirements for more reasons than one. In such selections, which are avowedly meant for students of particular standards, great care has to be taken to see that the language, the grammar and the ideas of the subject matter are within their easy grasp. Boys of Standard IV can be said to make only a very modest beginning in the vast field of Sanskrit Grammar wherein they advance somewhat further in the next standard: still even after two years' study of Sanskrit, their knowledge is quite elementary. For these reasons special progressive literature in prose and poetry for juvenile readers would be quite welcome; but this is almost out of the question, as Sanskrit is an unspoken tongue. Under these circumstances the only recourse is to make selections and adaptations from the sacred heritage that has been left us by our worthy ancestors.

We have, therefore, ventured to undertake that delicate work. The present booklet, which has now been placed

before the public, is a humble attempt in that direction. It consists of two parts intended for the Fourth and Fifth Standards respectively. Each part is divided into two series for the convenience of teachers and students. The two series in each part should be taught in alternate years. Monotony to teachers will thus be avoided; while in the case of students there is a pretty good field for extra reading in the series left out in a particular year.

In Standard IV the teaching of verses may be begun after about three months' study of Sanskrit Grammar or even preferably in the second term. In Standard V, however, the allotted portion should be studied from the beginning of the year.

In the selections of verses we have been very particular about the ideas and grammatical forms to be placed before the students. As far as possible we have tried our level best to take up verses, the grammar of which would run on parallel lines with the course in Grammar studied by them in the particular standard. Certainly it will be too much to say that there is nothing outside the course. The difficulty of finding out a sufficiently large number of appropriate verses can be realised only by one who makes an attempt in that direction. Under these circumstances there are, we admit, a few verses in this booklet containing grammatical points beyond the course of the particular standard: but even these are such as can be easily understood by boys after a little explanation by the teacher. Barring such points the book is a collection of easy miscellaneous verses just suitable to the Fourth and Fifth standards. Care has been taken to see that the course is graduated. Verses even with the slightest bad idea find no room here. There are verses preaching the value and importance of Learning,

Truth, Industry, Character, Good Company &c. There are also verses condemning Ignorance, Idleness, Bad Company, Greed, Drinking, &c. The number of verses in each series is just such as can be studied within the course of a year in addition to Grammar and Prose Literature to be studied side by side.

With a view to grammatical accuracy, chastity of ideas, clearness of meaning, simplicity of language and in a very few cases symmetry of expression we have thought it advisable to introduce certain changes in the original readings. We hope that the same will be appreciated by teachers and by critical readers in general.

As the present book is a collection of general precepts which are universally useful, the sudents should be asked to commit them to memory after a thorough understanding thereof.

As the book is to be in the hands of young students, we have been particular about the clearness of printing and boldness of type. A similar collection of short stories in prose for standards IV and V is in preparation.

All suggestions will be cordially welcomed.

Ahmedabad,
1st December 1913.

K. R. JOGLEKAR.
V. G. SANT.

ERRATUM.

On page 23 read the last line of verse 47 thus :-

न केवलं वेदविदेव विद्वान्.

Sanctioned for use in schools by the Director of Public Instruction, Bombay.

Bom. Govt. Gaz. of July 9, 1914 p. 1526.

सुभाषितरत्नसमुच्चयः ।

PART I.

Presented with best compliments to
The President, Text-Books Committee,
Mysore Government
by
the Authors
Ahmedabad,
Jan. 26, 1916.

FIRST SERIES.

विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥ १ ॥

गुणो भूषयते रूपं शीलं भूषयते कुलम् ।
शान्तिर्भूषयते विद्यां दानं भूषयते धनम् ॥ २ ॥

अतिदानाद् बलिर्बद्धो ह्यतिदर्पात् सुयोधनः ।
विनष्टो रावणो लोभादति सर्वत्र वर्जयेत् ॥ ३ ॥

वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम् ।
वृथा दानं समर्थेभ्यो वृथा दीपो दिवाऽपि च ॥ ४ ॥

शोभते विद्यया विप्रः क्षत्रियो विजयेन वै ।
अर्थः पात्रे प्रदानेन लज्जया च कुलाङ्गना ॥ ५ ॥

सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः ।
तत्र सौरभनिर्माणे चतुरश्चतुराननः ॥ ६ ॥

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥ ७ ॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥ ८ ॥

क्रोधो मूलमनर्थानां क्रोधः संसारबन्धनम् ।
धर्मक्षयकरः क्रोधस्तस्मात् क्रोधं विवर्जय ॥ ९ ॥

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥ १० ॥

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ ११ ॥

अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ १२ ॥

एकोऽपि गुणवान् पुत्रो* निर्गुणैः किं शतैरपि ।
एकश्चन्द्रो जगन्नेत्रं नक्षत्रैः किं प्रयोजनम् ॥ १३ ॥

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ १४ ॥

अन्नदानं महद्दानं विद्यादानं महत्तरम् ।
अन्नेन क्षणिका तृप्तिर्यावज्जीवं तु विद्यया ॥ १५ ॥

कवयः किं न पश्यन्ति किं न खादन्ति वायसाः ।
मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति दुर्जनाः ॥१६॥

जनिता चोपनेता च विद्यायाश्च प्रदायकः ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ १७ ॥

पादपानां भयं वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद् भयम् ॥ १८ ॥

उद्योगः खलु कर्तव्यः फलं मार्जारवद् भवेत् ।
जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥ १९ ॥

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ २० ॥

---

* 'स्पृहणीयः' इति शेषः ।

दरिद्रोऽपि नरो नूनं तमाखुं नैव मुञ्चति ।
निवारितोऽपि मार्जारस्तमाखुं नैव मुञ्चति ॥ २१ ॥

कन्या वरयते रूपं* माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥ २२ ॥

धीराणां भूषणं विद्या मन्त्रिणां भूषणं नृपः ।
भूषणं च नयो राज्ञां शीलं सर्वस्य भूषणम् ॥ २३ ॥

पण्डिते हि गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।
तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥ २४ ॥

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ २५ ॥

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥ २६ ॥

गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः ॥ २७ ॥

वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोऽयं महात्मनाम् ॥ २८ ॥

* 'वरे' इति ज्ञेयम् ।

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः ।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे ॥ २९ ॥

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धं प्राप्तो महोदधिः ॥ ३० ॥

यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैः स्थले ।
आकाशे विहगैश्चैव तथा सर्वत्र वित्तवान् ॥ ३१ ॥

जायते नरकः पापात् पापं दारिद्र्यसम्भवम् ।
दारिद्र्यमप्रदानेन तस्माद् दानपरो भव ॥ ३२ ॥

दरिद्रान् भर कौन्तेय मा यच्छ प्रभवे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥ ३३ ॥

मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम् ।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥ ३४ ॥

निर्विषेणापि सर्पेण कर्तव्या महती फटा ।
विषं भवतु वा मा वा फटाटोपो भयङ्करः ॥ ३५ ॥

नष्टं चैव मृतं चैव नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषोऽयमतः स्मृतः ॥ ३६ ॥

लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशङ्कया ।
दाता तु विसृजत्यर्थं तयैव ननु शङ्कया ॥ ३७ ॥

परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥ ३८ ॥

धनिकः श्रोत्रियो राजा नदी वैद्यस्तथैव च ।
पञ्च यत्र न विद्यन्ते मा तत्र दिवसं वस ॥ ३९ ॥

ऋणशेषश्चाग्निशेषः शत्रुशेषस्तथैव च ।
पुनः पुनः प्रवर्तन्ते तस्माच्छेषं विनाशय ॥ ४० ॥

सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः ।
अर्धेन कुरुते कार्यं सर्वनाशः सुदुःसहः ॥ ४१ ॥

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥ ४२ ॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ४३ ॥

विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य ।
काञ्चनमणिसंयोगो नो जनयति कस्य लोचनानन्दम् ॥ ४४ ॥

इच्छति शती सहस्रं ससहस्रः कोटिमीहते कर्तुम् ।
कोटियुतोऽपि नृपत्वं नृपोऽपि बत चक्रवर्तित्वम् ॥ ४५ ॥

कुग्रामवासः कुजनस्य सेवा
कुभोजनं क्रोधमुखी च भार्या ।
मूर्खश्च पुत्रो विधवा च कन्या
दहन्ति हेतानि जनं विनाग्निम् ॥ ४६ ॥

न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ ४७ ॥

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः ॥ ४८ ॥

त्यजन्ति सर्वेऽपि धनैर्विहीनं
पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ते
वित्तं हि लोके पुरुषस्य बन्धुः ॥ ४९ ॥

अङ्गं गलितं पलितं मुण्डं
दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं
तदपि न मुञ्चत्याशा पिण्डम् ॥ ५० ॥

SECOND SERIES.

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ १ ॥

लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ २ ॥

क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमया जीयते लोकः क्षमया किं न सिध्यति ॥ ३ ॥

दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनं च चौराणामनृतं बलम् ॥ ४ ॥

उपकारः परो धर्मः परार्थं कर्म नैपुणम् ।
पात्रे दानं परं सौख्यं परो मोक्षो वितृष्णता ॥ ५

उत्तमा आत्मनः ख्याताः पितुः ख्याताश्च मध्यमाः ।
अधमा मातुलात् ख्याताः श्वशुराच्चाधमाधमाः ॥ ६

दुर्मन्त्री राज्यनाशाय ग्रामनाशाय कुञ्जरः ।
श्यालको गृहनाशाय सर्वनाशाय दुर्जनः ॥ ७ ॥

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ॥ ८ ॥

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥ ९ ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वहते वायुः सत्यं सर्वस्य कारणम् ॥ १० ॥

किं कुलेन विशालेन शीलमेवात्र कारणम् ।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥ ११ ॥

कुस्थानस्य प्रवेशेन गुणवानपि पीड्यते ।
वैश्वानरोऽपि लोहस्थोऽयस्कारैरभिहन्यते ॥ १२ ॥

साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।
तीर्थं फलति कालेन सद्यः साधुसमागमः ॥ १३ ॥

शुचित्वं त्यागिता शौर्यं समत्वं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ १४ ॥

एकेन शुष्कवृक्षेण दह्यमानेन वह्निना ।
दह्यते काननं सर्वं दुष्पुत्रेण कुलं तथा ॥ १५ ॥

नास्ति क्षुधासमं दुःखं क्षुधा प्राणापहारिणी ।
नास्त्याहारसमं सौख्यमाहारः प्राणरक्षकः ॥ १६ ॥

मद्यपस्य कुतः सत्यं दया मांसाशिनः कुतः ।
अलसस्य कुतो विद्या निर्धनस्य कुतः सुखम् ॥ १७ ॥

प्रथमे* नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यसि ॥ १८ ॥

सर्पाणां च खलानां च परद्रव्यापहारिणाम् ।
मनोरथा न सिध्यन्ति तेनेदं वर्तते जगत् ॥ १९ ॥

न देवो विद्यते काष्ठे न पाषाणे न मृण्मये ।
भावे तु विद्यते देवस्तस्माद् भावो हि कारणम् ॥ २० ॥

* 'वयसि' इति शेषः ।

नास्ति विद्यासमं नेत्रं नास्ति सत्यसमं तपः ।
नास्ति लोभसमं दुःखं नास्ति त्यागसमं सुखम् ।।

पण्डिते चैव मूर्खे च बलवत्यपि दुर्बले ।
सधने निर्धने चैव मृत्योः सर्वत्र तुल्यता ।। २२ ।

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ।। २३

राजपत्नी गुरोः पत्नी भ्रातृपत्नी तथैव च ।
पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः ।। २

ज्ञातिभिर्भज्यते नैव चोरेणापि न नीयते ।
दानेन न क्षयं याति विद्यारत्नं महाधनम् ।। २५ ।।

पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु ।
लुब्धेन सञ्चितं द्रव्यं समूलं वै विनश्यति ।। २६ ।।

वैद्यराज* नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ।। २७

विवेकः सह सम्पत्त्या विनयो विद्यया सह ।
प्रभुत्वं प्रश्रयोपेतं चिह्नमेतन्महात्मनाम् ।। २८ ।।

---

* अत्र कुवैद्यो ज्ञेयः ।

सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।
मन्त्रेण सान्त्व्यते सर्पः खलस्तु न कथंचन ॥ २९ ॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने किं दरिद्रता ॥ ३० ॥

न देवाय न धर्माय न बन्धुभ्यो न चार्थिने ।
दुर्जनस्यार्जितं वित्तं ह्रियते खलु तस्करैः ॥ ३१ ॥

गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ॥ ३२ ॥

गीतशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥ ३३ ॥

यस्मिन् देशे न सम्मानो न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः शक्यो मा तत्र दिवसं वस ॥ ३४ ॥

जीवन्तोऽपि मृताः पञ्च व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ ३५ ॥

शते वै जायते शूरः सहस्रे खलु पण्डितः ।
वक्ता दशसहस्रे च दाता भवति वा न वा ॥ ३६ ॥

अतिसञ्चयकर्तॄणां वित्तमन्यस्य हेतवे ।
अन्यैः सञ्चीयते यत्नादन्यैश्च मधु पीयते ॥ ३७

काक आह्वयते काकान् याचको न तु याचकान्
काकयाचकयोर्मध्ये वरं काको न याचकः ॥ ३८

रविश्चन्द्रो घना वृक्षा नद्यो गावश्च सज्जनाः ।
एते परोपकारार्थमीश्वरेण विनिर्मिताः ॥ ३९ ॥

च्युता दन्ताः सिताः केशा दृष्टिरोधः पदे पदे ।
क्षीणं जीर्णमिमं देहं तृष्णा नूनं न मुञ्चति ॥ ४०

गुणवज्जनसम्पर्काद् याति नीचोऽपि गौरवम् ।
पुष्पाणामनुषङ्गेण सूत्रं शिरसि धार्यते ॥ ४१ ॥

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न मानवाः ॥ ४२ ॥

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
एतानि यत्र वर्तन्ते तत्र देवः प्रसीदति ॥ ४३ ॥

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥ ४४ ॥

आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म ।
स्वाधीनता नराणां महदैश्वर्यं विनाप्यर्थैः ॥ ४५ ॥

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ॥ ४६ ॥

सत्यं तपो ज्ञानमहिंसतां च
विद्वत्प्रणामं च सुशीलतां च ।
एतानि यो धारयते स विद्वान्
न तत्र ग्रन्थाध्ययनं हि कारणम् ॥ ४७ ॥

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम् ॥ ४८ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां
परोपकारेण न चन्दनेन ॥ ४९ ॥

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥ ५०

सुभाषितरत्नसमुच्चयः ।

PART II.



FIRST SERIES.

पुस्तकं येन नाधीतं नाधीतं गुरुसन्निधौ ।
सभायां शोभते नैष हंसमध्ये बको यथा ॥ १ ॥

स जीवति गुणा यस्य धर्मो यस्य स जीवति ।
गुणधर्मविहीनो यो निष्फलं तस्य जीवितम् ॥ २ ॥

वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धाश्च ये जनाः ।
ते सर्वे धनवृद्धस्य द्वारे तिष्ठन्ति किङ्कराः ॥ ३ ॥

चाण्डालश्च दरिद्रश्च जनावेतौ समाविह ।
चाण्डालस्य न गृह्णन्ति दरिद्रो न प्रयच्छति ॥ ४ ॥

तीक्ष्णधारेण खड्गेन वरं जिह्वा द्विधा कृता ।
न तु मानं परित्यज्य देहि देहीति भाषणम् ॥

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नरा
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं सकलं कुलम् ॥ ७ ॥

उपकर्तुं यथा स्वल्पः* समर्थो न तथा महान्* ।
प्रायः कूपस्तृषां हन्ति न कदापि तु वारिधिः ॥

सुखार्थी च त्यजेद् विद्यां विद्यार्थी च त्यजेत् सुख
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥ १० ॥

बहूनामल्पसाराणां समवायो दुरत्ययः ।
तृणैर्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः ॥ ११ ॥

महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥ १२ ॥

---

* 'पुरुषः' इति शेषः ।

काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।
तथा सङ्गेन विदुषां मूर्खो याति प्रवीणताम् ॥ १३ ॥

विना कार्येण ये मूढा गच्छन्ति परमन्दिरम् ।
तेऽवश्यं लघुतां यान्ति कृष्णपक्षे यथा शशी ॥ १४ ॥

मित्रद्रोही कृतघ्नश्च तथा विश्वासघातकः ।
एते हि नरकं यान्ति वर्तते नात्र संशयः ॥ १५ ॥

निष्णातोऽपि हि वेदान्ते साधुत्वं याति नो खलः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ १६ ॥

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥ १७ ॥

चिन्तनीया हि विपदामादावेव प्रतिक्रियाः ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥ १८ ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ १९ ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ २० ॥

जानन्ति पशवो गन्धाद् वेदाज्जानन्ति पण्डिताः
चारैर्जानन्ति राजानो नेत्राभ्यामितरे जनाः ॥

सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥

द्वाविमौ पुरुषौ लोके न भूतौ न भविष्यतः ।
प्रार्थितं यश्च कुरुते यश्च नार्थयते परम् ॥ २३ ॥

वेपथुर्मलिनं वक्त्रं दीना वाग् गद्गदस्वरः ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥ २४

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान् ॥ २५

निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।
न सुवर्णाद् ध्वनिस्तादृग् यादृक् कांस्यात् प्रजायते ॥ २

सा श्रीर्या न मदं कुर्यात् तन्मित्रं यत् सदा समम् ।
स सुखी यो वितृष्णश्च स नरो यो जितेन्द्रियः ॥ २

गुरुशुश्रूषया विद्या प्राप्यते द्रविणेन वा ।
अथवा विद्यया विद्या न दृष्टं साधनान्तरम् ॥ २८ ॥

यावत् स्वस्थो ह्यसौ देहो यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्याः प्राणान्ते किं करिष्यसि ॥ २९ ॥

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ ३० ॥

स्थान एव नियोज्यन्ते भृत्याश्चाभरणानि च ।
न हि चूडामणिः पादे नूपुरं मूर्ध्नि धार्यते ॥ ३१ ॥

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्मिन् विश्वसेत् प्राज्ञो यदीच्छेच्छ्रेय आत्मनः ॥३२॥

सद्भिः सम्बोध्यमानोऽपि दुरात्मा पापपूरुषः ।
घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति ॥ ३३ ॥

गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम् ॥ ३४ ॥

सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽप्यशनमाप्नोति राम रामेति च ब्रुवन् ॥ ३५ ॥

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देश एरंण्डोऽपि द्रुमायते ॥ ३६ ॥

विदुषां वदनाद् वाचः सहसा यान्ति नो बहि
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥ ३

उदये सविता रक्तो रक्तश्चास्तमने तथा ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥ ३८

श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र* यत्र तिष्ठन्त्यसाधवः ॥ ३९

सज्जना एव साधूनां प्रथयन्ति गुणोत्करम् ।
पुष्पाणां सौरभं प्रायस्तनुते दिक्षु मारुतः ॥ ४०

यथा गजपतिः श्रान्तः छायार्थी वृक्षमाश्रितः ।
विश्रम्य तं द्रुमं हन्ति तथा नीचः स्वमाश्रयम् ॥

युध्यन्ते पक्षिपशवः पठन्ति शुकसारिकाः ।
दातुं शक्नोति यो वित्तं स शूरः स च पण्डितः ॥

युधिष्ठिरो यक्षं प्रति ब्रूते—

पञ्चमेऽहनि वा षष्ठे शाकं पचति यो गृहे ।
अनृणी चाप्रवासी च स वारिचर† मोदते ॥ ४३ ।

* तत्र शोको भवतीत्यर्थः ।   † हे यक्ष ।

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रमत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥ ४४ ॥

गुणैर्गौरवमायाति न महत्याऽपि सम्पदा ।
पूर्णेन्दुर्न तथा वन्द्यो निष्कलङ्को यथा कृशः ॥ ४५ ॥

प्रभुभिः पूज्यते लोके कलैव न कुलीनता ।
कलावान् धार्यते मूर्ध्नि सत्सु देवेषु शम्भुना ॥ ४६ ॥

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते ॥ ४७ ॥

किं कुलेनोपदिष्टेन* शीलमेवात्र कारणम् ।
भवन्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥ ४८ ॥

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतद् विदुर्बुधाः ॥ ४९ ॥

महानुभावसंसर्गः कस्य नोन्नतिकारकः ।
रथ्याम्बु जाह्नवीसङ्गात् त्रिदशैरपि वन्द्यते ॥ ५० ॥

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ ५१ ॥

---

* ' किं कुलस्य कथनेन ' इत्यर्थः ।

पिबन्ति मधु पद्मेषु भृङ्गाः केसरधूसराः ।
हंसाः शैवालमश्नन्ति धिग् दैवमसमञ्जसम् ॥ ५२ ॥

सेवया धनमिच्छद्भिः सेवकैः पश्य किं कृतम् ।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ ५३ ॥

यश्च सञ्चरते*देशान् सेवते यश्च पण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥ ५४ ॥

अयुक्तं बहु भाषन्ते यत्र कुत्रापि शेरते ।
नग्ना विक्षिप्य गात्राणि बालका इव मद्यपाः ॥ ५५

अन्तःसारविहीनस्य सहायः किं करिष्यति ।
मलयेऽपि स्थितो वेणुर्वेणुरेव न चन्दनः ॥ ५६ ॥

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ ५७ ॥

आशाया ये दासास्ते दासाः सर्वलोकस्य ।
आशा येषां दासी तेषां दासायते लोकः ॥ ५८ ॥

शरदि न वर्षति गर्जति वर्षति वर्षासु निःस्वनो मेघः
नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥ ५९

* चर् with सम् is Ubhayapadi.

छिन्नोऽपि रोहति तरुश्चन्द्रः क्षीणोऽपि वर्धते लोके ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न लोकेऽस्मिन् ॥ ६० ॥

नलिकागतमपि पुच्छं न भवति सरलं हि सारमेयस्य ।
तद्वत् खलजनहृदयं बोधितमपि नैव याति माधुर्यम् ॥ ६१ ॥

दातव्यं भोक्तव्यं सति विभवे सञ्चयो न कर्तव्यः ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ॥ ६२ ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरान्ति ॥ ६३ ॥

रत्नाकरः किं कुरुते स्वरत्नै-
र्विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डवृक्षैर्मलयाचलः किं
परोपकाराय सतां विभूतयः ॥ ६४ ॥

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
श्रुत्वा हि सूक्तानि सदा वदन्ति ॥ ६५ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ ६६ ॥

याचना हि पुरुषस्य महत्त्वं
नाशयत्यखिलमेव तथा हि* ।
सद्य एव भगवानपि विष्णु-
र्वामनो भवति याचितुमिच्छन् ॥ ६७ ॥

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
सुस्वादुतोयाः प्रवहन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥ ६८ ॥

---

* वद् यथा ।

सत्सङ्गाद् भवति हि साधुता खलानां
साधूनां न तु खलसङ्गमात् खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न तु कुसुमानि धारयन्ति ॥ ६९ ॥

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ७० ॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चापि रमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या ॥ ७१ ॥

कः पद्मवने रतिं न कुरुते हंसो न कूपोदके
मूर्खः पण्डितसङ्गमे न रमते दासो न सिंहासने ।
वः सज्जनसङ्गमे न रमते नीचं जनं सेवते
यत्सत्यं प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥ ७२ ॥

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयो
धेनुः कामदुघा सदैव फलदा नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणं
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु ॥ ७३ ॥

वासो वल्कलमास्तरः किसलयान्योकस्तरूणां तलं
मूलानि क्षतये क्षुधो गिरिनदीतोयं तृषाशान्तये ।
क्रीडा मुग्धमृगैर्वयांसि सुहृदो नक्तं प्रदीपः शशी
स्वाधीने विभवेऽपि हन्त कृपणा याचन्त इत्यद्भुतम् ॥ ७४ ॥

यो नात्मजे न च गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ ७५ ॥



SECOND SERIES.

हर्तुर्न गोचरं याति दत्ता भवति विस्तृता ।
कल्पान्तेऽपि न सा नश्येत् किमन्यद् विद्यया समम् ॥ १ ॥

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ।
केचिज्ज्ञानावलेपेन केचिद् दुष्टैश्च नाशिताः ॥ २ ॥

ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च नोत्तमाधमयोः पुनः ॥ ३ ॥

को न याति वशं लोके मुखे पिण्डेन पूरितः ।
मृदंगो मुखलेपेन करोति मधुरध्वनिम् ॥ ४ ॥

दुर्जनेन समं सख्यं मा कुरुष्व कदाचन ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ ५ ॥

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ ६ ॥

कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥ ७ ॥

परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति ॥ ८ ॥

विहाय पौरुषं यो हि दैवमेवावलम्बते ।
प्रासादसिंहवत् तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥ ९ ॥

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः
साधुसङ्गतिरेताभ्यां नूनं शीततरा स्मृता ॥ १० ॥

यस्य मित्रेण सम्भाषा यस्य मित्रेण संस्थितिः ।
मित्रेण सह यो भुङ्क्ते स मतः पुण्यवान् बुधैः ॥ ११ ॥

वाणी रसवती यस्य भार्या प्रेमवती सती ।
लक्ष्मीर्दानवती यस्य सफलं तस्य जीवितम् ॥ १२ ॥

सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ।
प्रतिकूलेषु भाग्येषु त्यजन्ति स्वजनं खलु ॥ १३ ॥

क्षमापरं तपो नास्ति न सन्तोषात् परं सुखम् ।
न च लोभात् परो व्याधिर्न च धर्मो दयापरः ॥ १४ ॥

यौवनं जरया ग्रस्तमारोग्यं व्याधिभिर्हतम् ।
जीवितं मृत्युरभ्येति तृष्णैका निरुपद्रवा ॥ १५ ॥

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
अक्षणस्य कुतो विद्या अकणस्य कुतो धनम् ॥ १६ ॥

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ १७ ॥

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्
ग्रामं जनपदस्यार्थे ह्यात्मार्थे च महीं त्यजेत् ॥ १८ ॥

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥ १९ ॥

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥ २० ॥

चलत्येकेन पादेन तिष्ठत्यन्येन पण्डितः ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ २१ ॥

द्वाविमौ पुरुषौ लोके सुखिनौ न कदाचन ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ २२ ॥

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥ २३ ॥

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम्* ॥ २४ ॥

एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिका लोका न लोकास्तत्त्वदर्शिनः ॥ २५ ॥

कुसुमानां यथा हृद्यं सारं गृह्णाति षट्पदः ।
सारं तथैव गृह्णाति शास्त्राणां खलु पण्डितः ॥ २६ ॥

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥ २७ ॥

पुस्तकस्था हि या विद्या धनं यद् वाऽन्यहस्तगम् ।
नोपकुर्याज्जनस्येह कार्यकाले समुत्थिते ॥ २८ ॥

---

* अरण्यभवम् ।

भये महति वा हर्षे सम्प्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ॥ २९ ॥

आपन्नाशाय विबुधैः कर्तव्याः सुहृदोऽमलाः
न तरत्यापदं कश्चिद् योऽत्र मित्रविवर्जितः ॥ ३० ॥

यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान् स्वान् हितान् गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ॥ ३१ ॥

दुर्जनो जीयते युक्त्या विग्रहेण न धीमता ।
निपात्यते महावृक्षस्तत्समीपक्षितिक्षयात् ॥ ३२ ॥

किं कुलेन विशालेन विद्याहीनस्य देहिनः ।
अकुलीनोऽपि विद्यावान् विबुधैरपि पूज्यते ॥ ३३ ॥

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ ३४ ॥

स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोऽसताम् ।
न त्यजन्ति रुतं मञ्जु काकसम्पर्कतः पिकाः ॥ ३५ ॥

अहो खलभुजङ्गस्य विपरीतो वधक्रमः ।
एकस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥ ३६ ॥

यथा परोपकारेषु नित्यं जागर्ति सज्जनः ।
तथा परापकारेषु नित्यं जागर्ति दुर्जनः ॥ ३७ ॥

लोभाविष्टो नरो वित्तं वीक्षते न स आपदम् ।
दुग्धं पश्यति मार्जारो यथा न लगुडाहतिम् ॥ ३८ ॥

जानीयात् सङ्गरे भृत्यान् बान्धवान् व्यसनागमे ।
आपत्कालेषु मित्राणि भार्यां च विभवक्षये ॥ ३९ ॥

देहीति वचनं श्रुत्वा देहस्थाः पञ्च देवताः ।
मुखान्निर्गत्य गच्छन्ति श्रीह्रीधीधृतिकीर्तयः ॥ ४० ॥

यस्य नास्ति विवेको वै केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रार्थान् दर्वी पाकरसानिव ॥ ४१ ॥

चितां प्रज्वलितां दृष्ट्वा वैद्यो* विस्मयमागतः ।
नाहं गतो न मे भ्राता कस्येदं हस्तलाघवम् ॥ ४२ ॥

नारिकेलसमाना हि दृश्यन्ते खलु सज्जनाः ।
अन्ये बदरिकातुल्या बहिरेव मनोहराः ॥ ४३ ॥

त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः ।
त्यागाज्जगति पूज्यन्ते नूनं वारिदपादपाः ॥ ४४ ॥

---

* 'कुवैद्यः' इत्यर्थः ।

दानोपभोगरहिता दिवसा यस्य यान्ति वै ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ ४५ ॥

कुसुमस्तबकस्येव द्वे गतीह मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ४६ ॥

गुणेन स्पृहणीयः स्यान्न रूपेण पुनर्जनः ।
गन्धहीनं न गृह्णाति पुष्पं कान्तं हि पूरुषः ॥ ४८ ॥

योजनानां सहस्रं वै शनैर्गच्छेत् पिपीलिका ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥ ४८ ॥

नासत्यवादिनः सख्यं न पुण्यं न यशो भुवि ।
दृश्यते नापि कल्याणं कालकूटमिवाश्नतः ॥ ४९ ॥

यः स्वभावोऽहि यस्यास्ति स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् ॥ ५० ॥

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् कुक्कुरेणापि जीयते ॥ ५१ ॥

न मातरि न दारेषु न सोदर्ये न चात्मनि ।
विश्वासस्तादृशो नृणां यादृङ् मित्रे हितैषिणि ॥ ५२ ॥

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैर्भारं वहति रासभी ॥ ५३ ॥

शिरसा धार्यते सोमो नीलकण्ठेन सर्वदा ।
तथापि कृशतां याति कष्टः खलु पराश्रयः ॥ ५४ ॥

यो न सञ्चरते*देशान् सेवते न च पण्डितान् ।
तस्य सङ्कुचिता बुद्धिर्घृतबिन्दुरिवाम्भसि ॥ ५५ ॥

वैकल्यं धरणीपातमयथोचितजल्पनम् ।
सन्निपातस्य चिह्नानि मद्यं सर्वाणि दर्शयेत् ॥ ५६ ॥

किमत्र चित्रं यत् सन्तः परानुग्रहतत्पराः ।
न हि स्वदेहशैत्याय जायन्ते चन्दनद्रुमाः ॥ ५७ ॥

विरला जानन्ति गुणान् विरलाः कुर्वन्ति निर्धने स्नेहम् ।
विरलाः परकार्यरताः परदुःखेनापि दुःखिता विरलाः॥५८ ॥

रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वम् ।
असतां च निर्दयत्वं स्वभावसिद्धं त्रिषु त्रितयम् ॥ ५९ ॥

अमृतं किरति हिमांशुर्विषमेव फणी समुद्गिरति ।
गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति ॥ ६० ॥

* चर् with सम् is Ubhayapadi.

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥६१॥

अर्थी करोति दैन्यं लब्धार्थो गर्वमपरितोषं च ।
नष्टधनोऽस्ति सशोकः सुखमास्ते निःस्पृहः पुरुषः ॥ ६२ ॥

गुणवन्तः क्लिश्यन्ते प्रायेण भवन्ति निर्गुणाः सुखिनः ।
बन्धनमायान्ति शुका यथेष्टसञ्चारिणः काकाः ॥ ६३ ॥

न पण्डिताः साहसिका भवन्ति
श्रुत्वाऽपि ते सन्तुलयन्ति तत्त्वम् ।
तत्त्वं समादाय समाचरन्ति
स्वार्थं प्रकुर्वन्ति परस्य चार्थम् ॥ ६४ ॥

मुक्ताफलैः किं मृगपक्षिणां च
मिष्टान्नपानेन च किं खराणाम् ।
अन्धस्य दीपेन च कोऽस्ति हेतु-
र्गीतेन कोऽर्थो बधिरस्य चापि ॥ ६५ ॥

जानामि नागेन्द्र तव प्रभावं
कण्ठे स्थितो गर्जसि शङ्करस्य ।
स्थानं प्रधानं न बलं प्रधानं
स्थाने स्थितः कापुरुषोऽपि शूरः ॥ ६६ ॥

दानाय लक्ष्मीः सुकृताय विद्या
चिन्ता परब्रह्मविनिश्चयाय ।
परोपकाराय वचांसि यस्य
वन्द्यस्त्रिलोकीतिलकः स एव ॥ ६

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥

कल्पद्रुमः कल्पितमेव सूते
सा* कामधुक् कामितमेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते
सतां तु सङ्गः सकलं प्रसूते ॥ ६९ ॥

* ' प्रसिद्धा ' इत्यर्थः ।

Le